**Code No.: MFLS-03**

Total No. of Questions : 5 | Total No. of Printed Pages : 2

# स्नातकोत्तरपरीक्षाः– २०१५

## एम्.ए. – विद्वदुत्तमा – प्रथमवर्षम्

## शास्त्रम् – संस्कृतसाहित्यम्

### भागः – १, पत्रिका – ३

### विषयः – चण्डकौशिकम्

**दिनाङ्कः –** 27.3.2015 | **गरिष्ठाङ्काः – ८०**

**समयः –** 10.00 A.M. to 1.00 P.M. | Max. Marks – 80

---

**I.** एकेन वाक्येन उत्तरयत – **10 × 1 = 10**

१. चण्डकौशिकस्य कर्ता क्षेमीश्वरः कस्य राज्ञ आस्थाने आसीत्?

२. शैब्यायाः चेटी का?

३. विदूषकस्य नाम किम्?

४. अलं सन्तापितेन! बहुवल्लभाः खलु राजानः – इदं कस्या वचनम्?

५. राज्ञे हरिश्चन्द्राय सपत्नीकाय स्वस्त्ययनशेषं शान्त्युदकं केन प्रेषितम्?

६. विश्वामित्र आत्मानं विगर्हयतो विमानचारिणः कान् शप्तवान्?

७. कः क्रीडावराहस्य रूपं धृत्वा हरिश्चन्द्रस्य दृष्टिपथे पतति?

८. विक्रयप्रसङ्गे शैब्या ब्राह्मणं स्वकीयं कं समयं निवेदयति?

९. भगवतीनां विद्यानां सिद्ध्ये को यतते?

१०. सुष्ठु खल्विदमुच्यते – दुःखं दुःखैः तिरोधीयते इति कस्य स्वगतं वचनम्?

**II.** त्रीणि वाक्यानि सप्रसङ्गं व्याख्यात – **3 × 5 = 15**

१. निद्रा हि नाम प्राणिनां प्रथममिदं शरीरधारणनिमित्तम्।

२. अद्य प्रभृति मे मासमवधिं क्षन्तुमर्हसि।

३. अनपराद्धं किल शैशवम्, तन्नार्हस्येवं कर्तुम्।

४. अलं व्रीडया, योगचक्षुषो हि वयं विदितवृत्तान्ता एव भवतः।

५. अनुद्भिद्यमानदशनाङ्कुरस्य स्मरामि शैशवं मन्दभाग्यः।

Code No.: MFLS-03

III. प्रश्नत्रयं विस्तरेण उत्तरयत – 3 × 10 = 30

१. भर्तुः हरिश्चन्द्रस्य स्वमन्दिरं प्रति अनागमनेन शैब्यायाः कीदृशं वैक्लव्यं जातम्? तच्च कथमुपशान्तम्?

२. विश्वामित्रः केन हेतुना हरिश्चन्द्रे क्रुद्धः? तस्य च परिणामः कः?

३. हरिश्चन्द्रः कस्माद्धेतोः वाराणसीं गतः? तत्र किं कारणमात्मनो भार्यायाश्च विक्रयणे मतिं करोति?

४. कविः हरिश्चन्द्रमुखेन श्मशानं कथं वर्णयति? विशदयत।

५. सत्यसन्धस्य हरिश्चन्द्रस्य जीवनं कथं सुखान्तं सम्पन्नम्? स्फुटयत।

IV. सप्रसङ्गं श्लोकत्रयं व्याख्यात – 3 × 5 = 15

१. खिन्नं विनोदयति मानसमातनोति
स्थैर्यं चले वपुषि लाघवमादधाति।
उत्साहबुद्धिजननीं रणकर्मयोग्यां
राज्ञां मुधैव मृगयां व्यसनं वदन्ति।।

२. कामं हरिर्भव विमूढ! भवाथ चन्द्र–
श्चन्द्रार्धमौलिरथवा हर एव भूयाः।
विद्याप्रणाशपरिवर्धितघोरदीप्तेः
क्रोधानलस्य मम नेन्धनतां प्रयासि।।

३. आराध्योऽयं ब्राह्मणस्ते स्वशिष्यः
पत्नी चास्य प्रीतिदायोपचार्या।
रक्ष्याः प्राणा बालकः पालनीयो
यद् यद्देवं शास्ति तत्तद्विधेयम्।।

४. चलन्ति गिरयः कामं युगान्तपवनाहताः।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः।।

५. नेष्टं न दत्तं न कुलोचितानि सुखान्यवाप्तानि यशो न कीर्णम्।
न्यग्रोधबीजाङ्कुरमूषरस्थं विडम्बयन् वत्स! दिवं गतोऽसि।।

V. द्वयोः पात्रचित्रणं कुरुत – 2 × 5 = 10

१. शैब्या

२. विश्वामित्रः

३. रोहिताश्वः

४. धर्मः